Gyanshauryam, International Scientific Refereed Research Journal
© 2020 GISRRJ | Volume 3 | Issue 6 | ISSN : 2582-0095

# वैराग्य श्री विभूणितां जीवनं प्रारम्भादेव विभाति



डॉ .मुकेश कुमार डागरः
धर्माचार्यः प्राचार्य,
सिद्धि विनायक कॉलेज, सीकर, राजस्थान,भारत।

**Article Info**
Volume 3 Issue 6
Page Number: 98-109
**Publication Issue :**
November-December-2020
**Article History**
Accepted : 01 Dec 2020
Published : 25 Dec 2020

**सारांशः**– आत्मसंस्कारस्यापरं नाम दीक्षा वर्तते। मायया सांसारिकाणामात्माच्छादिता अवति। आत्मनः शाश्वतिकं स्वरूपं पूर्णानन्दमयं वर्तते। दीक्षया मलिनस्यात्मनः संस्कारः सम्पद्यते। अनया प्रक्रियया मलापनयनं भवति पुनश्च निवृत्तेः संस्कारोऽपि शान्तत्वमुपैति - दीयते ज्ञानसद्भावः क्षीयते पशुवासना। दानक्षपण संयुक्ता दीक्षातेनेह कीर्तिता।। अयमर्थः येन माध्यमेन ज्ञानं दीयते, पशु वासनायाः सर्वथाक्षयो भवति। दानक्षपणाभ्यां युता क्रिया दीक्षापदवाच्या।

**मुख्यशब्दः**– वैराग्य, अनन्त श्री, विभूणितां ,जीवनं ,प्रारम्भादेव, विभाति

वैराग्य-दीक्षाश्च विमर्शः – अनन्त श्री विभूषितानां नारायणदासमहाराजानां जीवनं प्रारम्भादेव बैराग्यमयं विभाति। बाल्यावस्थायां महाराजस्य शान्ततमं जीवनमासीत्। बालकैः वयस्यैः सह क्रीडन्नपि अध्यात्मविषयस्य चर्चा भवति स्म। यथा प्रह्लादस्य चरितं श्रूयते सर्वान् सांसारिकान् बालान् संघीकृत्य परमेश्वरस्य गुणानुवादं करोति स्म एतत् सर्वमपि श्री नारायणदासस्य जीवने श्रूयते। महाराजस्य विषये पार्थवलिंग निर्माणस्य कथा व्यक्तित्वस्य परीक्षणाय स्वभावज्ञानायालं विद्यते। मृत्तिकाभिः प्रत्यह्यि बहूनि शिवलिङ्गानि निर्मीयन्ते स्म। युवानः वयस्याः वृद्धाश्च महाराजस्याध्यात्मिकं ज्ञानं, शुचिभावं च विलोक्य ज्ञातवन्तःअयमासाधारण: कश्चित् सिद्धो योगी वर्तते यो हि अस्माकं समाजे भौतिकं देहं प्राप्य जीवनस्य पारमार्थिकं सत्यमवगाहते। एतस्य दर्शनादेव मनसः मालिन्यं अपगच्छति। नारायणदासस्य मुखमण्डलं विलोक्य श्रीभगवान् दास महाराजः गद्गदो जातः । यस्य बालकस्य प्रीति भगवति वर्तते अवश्यमेवाग्रे विश्वस्य समग्रस्य कल्याणं करिष्यति।

श्री नारायणदासमहाराजः क्षयरोगेण पीडितो बभूव। बहुभिरुपचारैः स्वस्थो न जातः। रोगिनं बालकं विलोक्य माता चिन्ताग्रस्ता जाता पुनः बृद्धानां पारिकानाञ्च वचनं श्रुत्वा आशीर्वादग्रहणार्थं बालकमादाय माता श्रीभगवानदासमहाराजस्य चरणारविन्दे समर्पितवती।

स्थानं सम्प्राप्य गुरोः दर्शनञ्च कृत्वा बालकस्य रोगः विनष्टप्राय एवाभवत्। मपि योग्यं शिष्यं प्राप्य आनन्दमग्नहृदयोऽभवत्। महाराजस्याशीर्वचनं श्रुत्वा माता धन्याजाता महाराजस्य श्रीभगवान्दासस्यादेशानुसारं बालकं श्री नारायणं व योजितवती। बालकोऽपि तत्स्थानं संप्राप्यात्मतोषं च लब्ध्वा भगवत् सेवायां साधसेवायां चानन्दमवाप। पुनः बहुप्रयासेऽपि गार्हस्थ्य धर्मपरिपालनाय गृहं नागच्छत्। बालकस्य वैराग्यभावं सुदृढं मत्वा आचार्यः श्री गवान्दासः राममन्त्रस्य पुरश्चरण सम्पादनाय बालकं प्रेरयामास। गुरोरनुज्ञया श्रीनारायणः द्वादशवर्षं यावत् पवर्तशृंखलायां स्थित्वा ग्रीष्मे, वर्षौ, शीते च तपश्चर्यामकरोत् राममन्त्रस्य जपप्रभावात् नारायणदासस्य भौतिके शरीरे दिव्यं परिवर्तनमभूत् । कान्तिमयं शरीरमभवत्। शरीरे आकर्षणं दिव्यत्वञ्च सहैवासीत्। यत्र दृष्टिपातः भवति स्म सर्वं मंगलमयं स भवति

**Copyright :** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

स्म। स्पर्शनात् दोषयुक्तोऽपि पूतो भवति स्म। मुखान्निःसृता वाक् सत्यमेव भवति । यथा आप्तस्य कृते प्रमाणमुपलभ्यते एतत् सर्वं महाराजस्य व्यक्तित्वे समग्रतया द्रष्टुं शक्यते।

व्यक्ते : व्यक्तित्वस्य प्रभावः तस्य दर्शनात् (रूपदर्शनात्) भाषणात्, तस्य बाह्यकार्यं कठिनपरिस्थितौ धैर्यमथवा निर्णयः। व्यक्तित्वस्य द्विधा विभागो भवति बाह्यम्, आन्तरिकम् च।

रामनामप्रसादात् महाराजस्योभयविधं व्यक्तित्वं सौम्यं विभाति। दूरात् पथिकः संसारे भयाक्रान्तः जनः महाराजस्यालौकिकं स्वरूपं चरणारविन्दं च प्राप्य कृतार्थो जायते। यावत् कालं महाराजस्य मुखात् उपदेशोनिःसरति सहस्रशो जनाः निर्निमेष दृष्ट्या सकलं कार्यजालं दुःखजालं, कलिमलं, रागद्वेषं च विस्मृत्य सर्वं प्राप्नुवन्ति कृपायाः वृष्टिरेव तावत् भवति। महाराजस्य व्यवहारे जीवमात्रस्य कल्याणाय चिन्तनं विलोक्यते। समग्रे भारतेदेशे महाराजस्य शिष्याः रामनामावलम्बिनो दृश्यन्ते। महाराजस्य नाम श्रुत्वा जनास्तत्र धावन्ति । महाराजस्य व्यक्तित्वे किं वैशिष्ट्यमस्ति न जाने किन्तु जनाः दूरादेवाकृष्टाः भवन्ति।

श्रूयते पन्ना शासनस्य (रियासत इति नामधेयस्य) राजकुमारी पन्नानगरे ज्ञातवती महाराजः तां आकारयति। जयपत्तनस्य महाराजमानसिंहस्य प्रतिमायाः अनावरणसमये सा जयपुरमागतवती आगत्य च सद्य एव महाराजस्य दिव्यदर्शनार्थं त्रिवेणीमागतवती। महाराजस्य दर्शनं कृत्वा संतुष्टा सा पुनरागमनाय प्रतिज्ञां कृत्वा गतवती।

विदेशेऽपि बहवः शिष्याः सन्ति तेषु केचन अदृष्ट्वैव प्रभावं श्रुत्वा शिष्यतां स्वीकुर्वन्ति इटली देशस्थो भक्तः तत्रैव रामनाम्नः नामसंकीर्तनं करोति । महाराजस्य जीवने रामभक्तिः सर्वतोभावेन प्रसृता वर्तते। श्रीनारायणदास राजस्य त्रिवेणधाम्नि गाद्याभिषेकः विक्रसंवत् २०२८ मध्येऽभवत् । वैराग्यस्य मर्तिभूतः श्रीनारायणदास महाराजः भगवान्दासमहाराजात् दीक्षां स्वीकृत्य वैराग्यस्य उच्चादर्श प्रतिष्ठापितवान्। अद्य समग्रे भारते वैराग्यस्य चर्चा मुक्तकण्टेन सर्वे साधवः विद्वांसः नागरिकाश्च कुर्वन्ति।

वैराग्यरागरसिको नारायणदासः कदाचिदपि दोषदर्शनं नैव करोति।

रामानन्दसंप्रदाये अद्यतनीये काले श्रीनारायणदासतुल्यो द्वितीयः कश्चित् वीतराग वैष्णवाचार्यः नैवावलोक्यते। यस्य प्रतिव्यवहारे वैराग्यमेव स्फुटं भवति । तत्प्रभावात् लक्ष्मीश्चाञ्चल्यरहिता सदा सन्निकटे वसति। वैराग्यस्य प्रभावः शास्त्रादौ यथा कथितः सर्वं खलु दृश्यते ।

अस्माकं देशे वाह्याडम्बरस्य पूजनं नैव भवति। गुणैः मनुष्यः पूज्यते । गुणानामनुसन्धानं कृत्वैव समाजे कश्चित् पूज्यभावमाप्नोति । अष्टावक्रस्य कथायाः अनुसन्धानेन ज्ञायते अष्टावक्रस्य वाह्यव्यक्तित्वं कलेवरमुन्नतं नासीत् तथापि गुणाः सर्वे वसन्ति स्म। विद्यायाः साक्षात् भगवती सरस्वती अष्टावक्रस्य वाचि निवसति स्म फलतः असौ पूज्यो बभूव। वाल्मीकिनारदसंवादे च श्रूयते नारदः भगवतो रामस्य गुणानुवादाय वाल्मीकिं प्रेरयामास। मूलरामायणस्य शतशोकान् श्रावयित्वा आदिकवेः हृदि श्रद्धामारोपितवान् तत्प्रभावाच्च वाल्मीकिः आदिकाव्यं रामायणं रचयामास। भगवतः रामस्य दासानुदासः भक्तशिरोमणिः श्रीनारायणदासमहाराजस्य व्यक्तित्वे सम्पूर्णं वैशिष्ट्यं रामभक्तिप्रसादात् विभाति । महाराजस्य सम्पूर्ण व्यक्तित्वं स एव द्रष्टुं शक्नोति यस्य हृदि श्रद्धा दृढा भवति भक्तिश्च निश्चला भवेत्। सरल स्वभावः महाराजः दोषदर्शनात् सदा मुक्त एव। महाराजस्य दर्शनादेव दोषः गुणरूपे परिवर्तितो जायते। तपः स्वाध्याय निरतः . महाराजः भक्तानां कल्याणाय तत्परो दृश्यते।

दीक्षा - शास्त्रेषु दीक्षाविषये बहुविधं चिन्तनं श्रूयते। अध्यात्ममार्गे समुन्नत्यै दीक्षा प्रयोजनवती विभाति। आत्मज्ञानं गुरुपदिष्टेन मन्त्रेण संभवति । यया प्रक्रियया गुरुः शिष्याय ज्ञानं यच्छति मन्त्रं प्रददाति सा दीक्षेति कथ्यते तन्त्रशास्त्रे दीक्षायाः बृहत् कथनं दरीदृश्यते तद्यथा -

दीयते विमलं ज्ञानं क्षीयते कर्मवासना।<br>
तस्मात् दीक्षेति सा प्रोक्ता ज्ञानिभिः तंत्रवेदिभिः॥[1]

अयमर्थः विमलज्ञानस्यावाप्तिः कर्मवासनायाः क्षयः यावत्कालं न सम्पद्यते दीक्षायाः वास्तविकं ज्ञानं तावन्नोदेति। येन ज्ञानेन पापस्य सर्वथा क्षयः तथा शिवतत्वस्य लाभः जायते तदस्ति दिव्यंज्ञानम्। कैवल्यमुक्तिः दीक्षायाः फलं नास्ति। शास्त्राणां सार्वकालिकः सिद्धान्तः वर्तते दीक्षां विना जीवस्याज्ञाननिवृत्तिः नैव सम्भाव्यते उपायाः सन्ति बहुविधाः किन्तु दीक्षया अज्ञानस्य सर्वतोभावेन शमनं जायते जीवः शिवत्वमुपैति।

श्रीमद्देवीभागवते दीक्षातत्वस्यैकस्मिन्नध्याये गंभीरमनुसन्धानं वर्तते। नारदः नारायणं पप्रच्छ दीक्षायाः किं लक्षणं तथा दीक्षायां कस्याधिकारः वर्तते यद्यपि नारदस्य प्रश्नस्योपक्रमे तथ्यमिदं सुस्पष्टं दीक्षायां सर्वे अधिकृताः। तद्यथा –

ब्राह्मणानां क्षत्रियाणां विशां स्त्रीणां तथैव च।।
सामान्यविधिना सर्वं विस्तरेण वद प्रभो।।[2]

धर्मकृत्ये सामान्येन द्विजाः सर्वत्राधिकृताः किन्तु दीक्षायां स्त्रीणामपि अधिकारः प्रदत्तः। विदुषां मते यत् दिव्यं ज्ञानं ददाति तथा सर्वान् पापान् व्यपोहति सा दीक्षा। लौकिकं ज्ञानं लोकमाध्यमेन नाटकादि मञ्चनेन व्यवहारस्य सम्पादनेन च भवति किन्तु दिव्यं ज्ञानं दीक्षया कथ्यते। मनुष्यः कर्मफलप्रसंगात्
मलसंपृक्तः संसारे संसरति परन्तु मनुष्यस्य वास्तविकः स्वरूपः दिव्य एव। स निर्मलः आनन्दमयः वर्तते वैगुण्यात् कर्मविगर्हणात् च पंके निर्मग्नः दृश्यते। सकलकल्मष दहनाय दिव्यत्वप्राप्तये च दीक्षा आवश्यकी भवति उक्तञ्च –

दिव्यं ज्ञानं हि या दद्यात् कुर्यात् पापक्षयं तु या।
सैव दीक्षेति संप्रोक्ता वेदतन्त्रविशारदैः।।
अवश्यं सा तु कर्तव्या यतो बहुफला मता।
गुरुशिष्यावुभावत्राप्यतिशुद्धावलपेक्षितौ ।।
गुरुस्तु विधिवत्प्रातः कृत्यं सर्वं विधाय च।
स्नान संध्यादिकं सर्वं यथाविधि विधाय च ।।
कमण्डलु करो मौनी गृहं यायात्सरित्तटात् ।
यज्ञमण्डपमासाद्य विशेत्तत्रासने वरे ।।
आचम्य प्राणानायम्य गंधपुष्पविमिश्रतम्।"
सप्तवारास्त्रमन्त्रेण जप्तं वारि सुसाधयेत् ।।
वारिणा तेन मतिमानस्त्र मंत्रं समुच्चरन्।
प्रोक्षयेद्वारमखिलं ततः पूजां समाचरेत् ।।
ऊदुंवरके देवं गणनाथं तथा श्रियम् ।
सरस्वती नाममंत्रैः पूजयेद्गन्धपुष्पकै ।।
द्वारदक्षिणशाखायां गंगाविघ्नेशमर्चयेत् ।
द्वारस्य वामशाखायां क्षेत्रपालं च सर्यजाम् ।।
देहल्यां पूजयेदस्त्रदेवतामस्त्रमंत्रतः।
सर्वं देवीमयं दृश्यमिति संचित्य सर्वतः।।
दिव्यानुत्सारयेद्विघ्नानस्त्रमंत्रजपेन तु।
अन्तरिक्षगतान् विघ्नान्पादघातैस्तु भूमिगान्।।
वामशाखां स्पृशन्पश्चात् प्रविशेदक्षिणांघ्रिणा।
प्रविश्य कुंभं संस्थाप्य सामान्यायं विधाय च।।
वास्तुनाथं पद्मयोनिं गंधपुष्पाक्षतादिभिः।।
ततः कुर्यात् पंचगव्यं तेन चालुंदकेन च।
तोरणस्तंभपर्यन्तं प्रोक्षयेन्मंडपं गुरुः।।
सर्वं देवीमयं चेदं भावयेन्मनसा किल।
मूलमंत्र जपन्भक्त्या प्रोक्षणं स्याच्छराणुना।।
शरमंत्रं समुच्चार्य ताडयेन्मंडपक्षमाम् ।
हुंमंत्रं तु समुच्चार्य कुर्यादभ्युक्षणं ततः।।
धूपयेदंतरं धूपैर्विकारान् विकिरेत्ततः।

मार्जयेत्तास्तु मार्जन्या कुशनिर्मितया पुनः॥
ईशानदिशि तत्पुंजं कृत्वा संस्थापयेन्मुने।
पुण्याहवाचनं कृत्वा दोनानाथांश्च तोषयेत् ॥
विशेन्मृद्वासने पश्चान्नमस्कृत्य गुरुं निजम् ।
प्राङ्मुखो विधिवद्ध्यात्वा देयमंत्रस्य देवताम् ॥
भूतशुद्ध्यादिकं कृत्वा पूर्वोक्तेनैव वर्त्मना।
ऋष्यादिन्यासकं कुर्याद्देयमन्त्रस्य वै मुने ॥
न्यसेन्मुनिं तु शिरसि मुखे छंदः समीरितम्।
देवतां हृदयाम्भोजे गुह्ये बीजं तु पादयोः॥
शक्तिं विन्यस्य पश्चात्तु तालत्रयरवात्ततः।
दिग्बंधं कारयेत्पश्चाच्छोटिकाभिस्त्रिभिर्नरः।
प्राणायामं ततः कृत्वामूलमंत्रमनुस्मरन्।
मातृकां विन्यसेद्देहे तत्प्रकारस्तथोच्यते ॥"
ॐ अं नम इति प्रोच्य न्यसेच्छिरसि मंत्रवित्।
एवमेव तु सर्वेषु न्यसेत्स्थानेषु वै मुने ॥
मूलमंत्रं षडंगं तु न्यसेदंगेषु सत्तमः॥
अङ्गुष्ठादिष्वङ्गुलीषु हृदयादिषु च क्रमात् ।
नमः स्वाहा वषड्युक्तै हुँ वौषट् फट पदान्वितैः॥
प्रणवादियुतैर्मन्त्रैः षड्भिरेवं षडंगकम् ॥
वर्णन्यासादिकं पश्चात् मूलमंत्रस्य योजयेत् ।
स्थानेषु तत्तत्कल्पोक्तेष्विति न्यासाविधिः स्मृतः॥
ततो निजे शरीरेऽस्मिश्चिंतयेदासनं शुभम्।
दक्षांसे च न्यसेद्धर्मं वामांसे ज्ञानमेव च ॥
वामोरौ चैव वैराग्यं दक्षोरावथ विन्यसेत् ।
ऐश्वर्यं मुखदेशे तु मुने ध्यायेदधर्मकम् ॥
वामपार्श्वे नाभिदेशे दक्षपार्श्वे तथा पुनः।
नादींश्चापि ज्ञानादीन्पूर्वोक्तानेव विन्यसेत् ॥
पादा धर्मादयः प्रोक्ताः पीठस्य मुनिसत्तम्।
अधर्माद्यास्तु गात्राणि स्मृतानि मुनिपुंगवैः॥
मध्येनंतं हृदि स्थाने न्यसेन्मृद्वासने स्थले।
प्रपंचपद्मं विमलं तस्मिन् सूर्येन्दुपावकान् ॥
न्यसेत् कलायुतान्मन्त्रीसंक्षेपात्तावदाम्यहम्।
सूर्यस्य द्वादशकलास्ता इन्दोः षोडश स्मृताः॥
दशवह्नः कलाः प्रोक्ताः ताभिर्युकांस्तु तान्स्मरेत् ।
सत्वं रजस्तमश्चैव न्यसेत्तेषामथोपरि ॥
आत्मानमंतरात्मानं परमात्मानमेव च।
ज्ञानात्मानं न्यसेद्विद्वानित्थं पीठस्य कल्पना॥

अमुकासनाय नम इति मंत्रेण साधकः।
आसनं पूजयित्वा तु तस्मिन् ध्यायेत् परांबिकाम्।।
कल्पोक्तविधिना मंत्री देयमंत्रस्य देवताम्।
मानसैरुपचारैश्च पूजयेत्तां यथाविधि ।।
मुद्राः प्रदेर्शयेद्विद्वानकल्पोक्ता मोदकारिकाः।
याभिविरचिताभिस्तु मोदो देव्यास्तु जायते ।।

नारायण उवाच -

ततः स्ववामभागाग्रे षट्कोणोपरि वर्तुलम्।
चतुरस्रयुतं सम्यङ्मध्ये मंडलमालिखेत् ।।
मध्ये त्रिकोणं संलिख्य शंखमुद्रां प्रदर्शयेत्।
षडंगानि च षट्कोणेष्वर्चयेत्कुसुमादिभिः।।
अग्न्यादिषु तु कोणेषु षडंगार्चनमाचरेत्।
आधारपात्रमादाय शंखस्य मुनिसत्तम्।।
अस्त्रमंत्रेण संप्रोक्ष्य स्थापयेत्तत्र मंडले।
मं वह्निमंडलायोंक्त्वा ततो दशकलात्मने ।
अमुकदेव्या अर्घ्यपात्रस्थानाय नम इत्यपि।
मंत्रोऽयमुक्तः शंखस्याप्याधारस्थापने बुधैः।।
आधारे पूर्वमारभ्य प्रदक्षिणक्रमेण तु।
दशवह्निकलाः पूज्या वह्निमंडलसंस्थिताः।।
ततो वै मूलमंत्रेण प्रोक्षितं शंखमुत्तमम् ।
स्थापयेत्तत्र चाधारे मूलमंत्रमनुस्मरन्।।
अं सूर्यमण्डलायोक्त्वा द्वादशांते कलात्मने।
अमुकदेव्यर्यपात्राय नम इत्युच्चरेत्ततः।।
शं शंखाय पदं प्रोच्य नमः इत्येतदुच्चरेत् ।
प्रोक्षयेत्तेन तं शंखं तस्मिन् द्वादश पूजयेत् ।।
सूर्यस्य द्वादश कलास्तपिन्याद्या यथाक्रमम्।
विलोममातृकां प्रोच्य मूलमंत्रं विलोमकम्।।
जलौरापूरयेच्छंखं तत्र दोः कलां न्यसेत् ।
उं सोममण्डायोक्त्वांन्ते षोडशकलात्मने।।
अमुकामृतायेति हृन्मंत्रांतो मनुः स्मृतः।
पूजयेन्मनुना तेन जलं तु सृणिमुद्रया।।
तीर्थान्यावाह्य तत्रैवाप्यष्टकृत्वो जपेन्मनुम्।
षडंगानिजले न्यस्य हृदांसे पूजयेदपः।।
अष्टकृत्वो जपेन्मूलं छादयेन्मत्स्यमुद्रया।
ततो दक्षिणदिग्भागे शंखस्य प्रोक्षणीं न्यसेत् ।।
शंखांबु किंचिन्निक्षिप्य प्रोक्षयेत्तेन सर्वतः।
पूजाद्रव्यं निजात्मानं विशुद्धं भावयेत्ततः।।

नारायण उवाच -

ततः स्वपुरतोवेद्यां सर्वतोभद्रमंडलम्।
संलिख्य कर्णिकामध्यं पूरयेच्छालितंडुलैः॥
आस्तीर्य दर्भास्तत्रैव न्यसेत् कूच सलक्षणम्।
आधाशक्तिमारभ्य पीठमन्वंतमर्चयेत्॥
निव्रणं कुंभमादायाप्यस्त्राद्भिः क्षालितांतरम्।
तंतुना वेष्टयेत्तं तु त्रिगुणेनारुणेन च॥
नवरत्नोदरं कूर्चयुतं गंधादिपूजितम्।
स्थापयेत्तत्र पीठे तु तारांमत्रेण देशिकः॥
ऐक्यं कुंभस्य पीठस्य भावयेत्पूरयेत्ततः।
मातृकां प्रतिलोमेन जपंस्तीर्थोदकैर्मुने॥
मूलमंत्रं च संजप्य पूरयेद्देवताधिया।
अश्वत्थपनसाम्राणां कोमलैर्नवपल्लवैः।
छादयेत्कुं भवदनं चषकं सफलाक्षतम्॥
प्राणस्थापन मंत्रेण प्राणस्थापनमाचरेत्।
आवाहनादिमुद्राभिर्मोदयेदेवतां पराम्॥
ध्यायेत्तां परमेशानी कल्पोक्तेन प्रकारतः।
स्वागतं कुशलप्रश्नं देव्या अग्रे समुच्चरेत्॥
पाद्यं दद्यात्ततोऽप्यर्घ्यं ततश्चाचमनीयकम्।
मधपर्कं च साभ्यंगं देव्यै स्नानं निवेदयेत्॥
वाससी च ततो दाद्रक्ते क्षौमे सुनिर्मले।
नानामणिगणाकीर्णानाकल्पान्कल्पयेत्ततः॥
मनुनापुटितैर्वर्णैर्मातृकाया विधानतः।
देव्या अंगेषु विन्यस्य चन्दनाद्यैः समर्चयेत्॥
गंधः कालागुरुभवः कर्पूरेण समन्वितः।
काश्मीरं चन्दनं चापि कस्तूरी सहितं मुने॥
कुन्दपुष्पादिपुष्पाणिपरदेव्यै समर्पयेत्।
धूपोऽगुरुपुरुवातोशीर चन्दनशर्कराः॥
मधुमिश्राः स्मृता देव्याः प्रिया धूपात्मना सदा।
दीपाननेकान्दत्वाथ नैवेद्यं दर्शयेत्सुधीः॥
प्रतिद्रव्यं जलं दद्यात् प्रोक्षणीस्थं न चान्यथा।
ततः कुर्यादंगपूजां कल्पोक्तावरणानि च॥
सांगां देवीमथाभ्यर्च्य वैश्वदेवं ततश्चरेत्।
दक्षिणे स्थंडिलं कृत्वा तत्राधाय हुताशनम्॥
मूर्तिस्थां देवतां तत्रावाह्य सम्पूज्य च क्रमात्।
तारव्याहृतिभिर्हत्वा मूलमंत्रेण वैततः॥
लिविंशतिवारं तु पायसेन ससर्पिषा॥

हनेत्पश्चाद्व्याहृतिभिः पुनश्च जुहुयान्मुने।
गंधाद्यैरर्चयित्वा च देवीं पीठे तु योजयेत् ॥
वह्निं विसृज्य हविषा परितो विकिरेद्बलिम्।
देवतायाः पार्षदेभ्यो गंधपुष्पादिसंयुतान् ॥
पञ्चोपचारान् दत्वाऽथ ताम्बूलं छत्र चामरे ॥
दद्यादेव्यै ततो मंत्र सहस्रावृत्तितो जपेत्।
जपं समर्प्य चैशान्यै विकिरे दिशि संस्थिते॥
कर्करी स्थापयेत्तस्यां दुर्गामावाह्य पूजयेत् ।
रक्ष रक्षेति चोच्चार्य नालमुक्तेन वारिणा॥
अस्त्रमंत्र जपन्देशंसेचयेत्तु प्रदक्षिणम्।
कर्करी स्थापयेत्स्थाने पूजयेच्चास्त्रदेवताम्॥
पश्चाद्गुरुस्तु शिष्येण सह भुञ्जीतवाग्यतः ।
तस्यां रात्रौ तु तद्वेद्यां निद्रां कुर्यात्प्रयत्नतः ॥

नारायण उवाच –

ततः कुण्डस्य संस्कारं स्थण्डिलस्य च वा मुने।
प्रवक्ष्यामि समासेन यथाविधि विधानतः॥
नं समुच्चार्य वीक्षयेदस्त्रमंत्रतः। .
पोक्षयेत्ताडनं कुर्यात्तेनैव कवचेन तु ॥
अध्यक्षणं समुद्दिष्टं तिस्रस्तिस्रस्ततः परम्।
पागग्रा उदगग्राश्च लिखेल्लेखाः समंततः॥
प्रणवेन समभ्युक्ष्य पीठं देव्याः समर्चयेत्।"
आधारशक्तिमारभ्य पीठमन्त्रावसानकम्॥
तस्मिन् पीठे समावाह्य शिवौ परमकारणौ ।
गन्धाद्यैरुपचारैश्च पूजयेत्तौ समाहितः॥
देवीं ध्यायेदृतुस्नातां संसक्तां शंकरेण तु ।
कामातुरां तयोः क्रीडां किञ्चित्कालं विभावयेत्॥
अथ वह्निं समादाय पात्रेण पुरतो न्यसेत् ।
क्रव्यादांशं परित्यज्य पूर्वोक्तैर्वीक्षणादिभिः॥
संस्कृत्य वह्निं रंबीजमुच्चार्य तदनन्तरम्।
चैतन्यं योजयेत्तस्मिन् प्रणवेनाभिमंत्रयेत् ॥
सप्तवारं ततो धेनुमुद्रां संदर्शयेद्गुरुः।
शरेण रक्षितं कृत्वा तनुत्रेणावगुंठयेत् ॥
अर्चितं त्रिः परिभ्राम्य प्रादक्षिण्येन सत्तमः।
कण्डोपरि जपंस्तारं जानुस्पृष्टं महीतलः॥
शिवबीजधिया देव्या योनौ वह्नि विनिक्षिपेत् ।
आचामयेत्ततो देवं देवीं च जगदम्बिकाम्॥
चित्पिंगल हन दहपचयुग्मं ततः परम्।

सर्वज्ञाज्ञापय स्वाहा मंत्रोऽयं वह्नि दीपने ॥',
अग्निं प्रज्वलितं वंदे जातवेदं हुताशनम्।
सुवर्णवर्णमनलं समिद्धं विश्वतो मुखम् ॥
मंत्रेणानेन तं वह्नि स्तुवीत परमादरात्।
ततो न्यसेवह्निमंत्रं षडंगं देशिकोत्तमः॥
सहस्रार्चिः स्वस्तिपूर्ण उत्तिष्ठपुरुषः स्मृतः।
धूमव्यापी सप्तजिह्वो धनुर्धर इति क्रमात् ॥
जातियुक्ताः षडंगाः स्युः पूर्वस्थानेषु विन्यसेत् ।
ध्यायेद्वह्नि हेमवर्णं त्रिनेत्रं पद्मसंस्थितम्।
इष्टशक्तिं स्वस्तिकाऽभीर्धारकं मंगलं परम्॥
परिषिंचेत्ततः कुण्डं मेखलोपरि मंत्रवित् ॥
दर्भे : परिस्तरेत्पश्चात्परिघीन्विन्यसेदथ।
त्रिकोणवृतषट्कोणं साष्टपत्रं सभूपुरम् ॥
यंत्रं विभावयेद्वह्न : पूर्व वा संलिखेदथ।
तन्मध्ये पूजयेद्वहिं मंत्रेणानेन वै मुने॥
बैशानर ततो जातवेदः पश्चादिहावह ।
लोहिताक्षपदं प्रोक्त्वा सर्वकर्माणि साधय॥
वह्निजायांतको मन्त्रस्तेन वह्निं तु पूजयेत्।"
मध्ये षट्स्वपि कोणेषु हिरण्या गगना तथा॥
रक्ता कृष्णा सुप्रभा च बहुरूपातिरक्तिका।
पूजयेत्सप्तजिह्वास्ताः केसरेष्वंग पूजनम्॥
दलेषु पूजयेन्मूर्तीः शक्तिस्वस्तिकधारिणीः।
जातवेदाः सप्तजिह्वो हव्यवाहन एव च॥
अश्वोदरजसंज्ञोन्यः पुनर्वैश्वानराह्वयः।
कौमारतेजाः स्याद्विश्वमुखो देवमुखः स्मृतः॥
ताराग्नये पदाद्याः स्युर्नत्यंता वह्निमूर्तयः।
लोकपालांश्चतुर्दिक्षु वावा वज्राद्यायुद्यसंयुतान्॥
श्री नारायण उवाच -
ततः सुकृनुवसंस्कारावाज्यसंस्कार एव च।
कृत्वा होमं ततः कुर्यात्सुवेणादाय वै वृत्तम्॥
दक्षिणाद्धृतभोगात्तु वढेर्दक्षिणलोचने ।
नयादग्नये स्वाहेत्येवं वै वामतोऽन्यतः॥
मोमाय स्वाहेति मप्याघृतमादाय सत्तम।
अनीषोमाभ्यां स्वाहेति मध्यनेत्रे हुनेत्ततः॥
पनर्दक्षिणभागात्तु वृत्तमादाय वै मुखे।
अग्नये स्विष्टकृते स्वाहेत्यनेनैव हुनेत्ततः॥
सताराभियाहतिभिर्जुहुयादथ साधकः।

जुहुयादग्निमंत्रेण त्रिवारं तु ततः परम्॥
ततस्तु प्रणवेनेवाप्यष्टावष्टो घृताहुती:।
गर्भाधानादि संस्कार कृते तु जुहुयान्मुने ॥
गर्भाधानं पुंसवनं सीमन्तोन्नयनं ततः।
जातकर्म नामकर्माप्युपनिष्क्रमणं तथा ॥
अन्नाशनं तथा चूडाव्रतबंधस्तथैव च।
महानाम्न्यं व्रतं पश्चात्तथोपनिषदं व्रतम् ॥
गोदानोद्वाहको प्रोक्ता: संस्काराः श्रुतिचोदिताः।
ततः शिवं पार्वती च पूजयित्वा विसर्जयेत् ॥
जुहुयात्पंच समिधो वह्निमुद्दिश्य साधकः।
पादावरणानां चाप्येकैकामाहुति हुनेत्॥
पतं सुचिसमादाय चतुर्वारं सुवेण च।
विधाय तां तु तेनैव मुने तिष्ठन्निजासने॥
वौषडन्तेन मनुना वह्नस्तु जुहुयात्ततः।
महागणेशमंत्रेण जुहुयादाहुतीर्दश॥
वहौ पीठं समभ्यर्च्य देयमन्त्रस्य देवताम्।
वह्नौ ध्यात्वा तु तद्वक्त्रं पंचविंशतिसंख्ययया॥
मलमंत्रेण जुहुयाद्वक्कीकरणाय च।
वह्निदेवतयोरैक्यं भावयान्नात्मना । सह ॥
एकीभूतं भावयेत्तु ततस्तु साधकोत्तमः।
षडंगं देवतानां च जुहुयादाहुतीः पृथक् ॥
एकादशैव जुहुयाहुतीर्मुनिसत्तम।
एतेन नाडीसंधानं वह्निदेवतयोर्मुने ॥
एकैकक्रमयोगेनाप्यावृत्तीनां तथैव च।
एकैकक्रमयोगेन घृतेन जुहुयान्मुने ॥
ततः कल्पोक्तद्रव्यैस्तु जुहुयादथवा तिलैः।
देवतामूलमंत्रेण गजांतकसहस्रकम्॥
महत्वा ततो देवीं संतुष्टां भावयेन्मुने। .
तथैवावृतिदेवीश्च वयाद्या देवता अपि॥
ततः शिष्यं च सुस्नातं कृतसंध्यादिकक्रियाम्॥
वस्त्रदययतं स्वर्णाभरणेन समन्वितम्॥
कमण्डलुं करशुद्ध्यै कुंडस्यांतिकमानयेत्।
नमस्कृत्य ततः शिष्यो गुरुनथ सभासदः॥
कुलदेवं नमस्कृत्य विशेत्तत्राथ विष्टरे ।
गुरुस्ततस्तु तं शिष्यं कृपादृष्ट्या विलोकयेत्॥
तच्चैतन्यं निजेदेहे भावयेत् संगतं त्विति।
ततः शिष्यतनुस्थानामध्वनां परिशोधनम् ॥

कुर्यात्तु होमतो विद्वान्दिव्यदृष्ट्याऽवलोकनात् ।
येन जायेत शुद्धात्मा योग्यो देवाद्यनुग्रहे ॥

श्री नारायण उवाच -

ततो ध्यायेतु शिष्यस्य षडध्वनः क्रमेण तु।
पादयोस्तु कलाध्वानं लिंगे तत्वाधिकं पुनः॥
नाभौ तु भुवनाध्वानं वर्णाध्वानं तथा हदि।
पदाध्वानं तथा भाले मंत्राध्वानं तु मूर्धनि॥
शिष्यं स्पृशंस्तु कूर्चेन तिलैराज्यपरिप्लुतैः।
शोधयाम्यमुमध्वानं स्वाहेति मनुमुच्चरन्॥
ताराढ्यं जुहुयादष्ट वारं प्रत्यध्वमेव हि।
षडध्वनस्ततस्तांस्तु लीनान् ब्रह्मणि भावयेत्॥
पुनरुत्पादयेत्तस्मात्सृष्टिमार्गेण वै गुरुः।
आत्मस्थितं तच्चैतन्यं पुनः शिष्ये तु योजयेत् ॥
पूर्णाहुतिं ततो हुत्वा देवतां कलशे नयेत् ।
पुनर्व्याहृतिभिर्तुत्वा वढेरंगाहुतीस्तथा ॥
एकैकशो गुरुर्दत्वा विसृजेद्वह्निमात्मनि ।
ततः शिष्यस्य नेत्रे तु बहनीयाद्वाससा गुरुः॥
नेत्रेमंत्रेण तं शिष्यं कुण्डतो मंडलं नयेत् ।
पुष्पाञ्जलिं मुख्य देव्यां कारयेच्छिष्यहस्ततः॥
नेत्रबंधं निराकृत्य वेशयेत्कुशविष्टरे ।
भूतशुद्धिं शिष्यदेहे कुर्यात्प्रोक्तेन वर्मना॥
मंत्रोदितांस्तथा न्यासान्कृत्वा शिष्यतनौ ततः।
मंडले वेशयेच्छिष्यमन्यस्मिन्कुम्भसंस्थितान्॥
पल्लवाञ्छिष्यशिरसि विन्यसेन्मातृकां जपेत् ।
कलशस्थलजलैः शिष्यं स्नापयेद्देवतात्मकैः॥
वर्धनीजलसेकं च कुर्याद्रक्षार्थमंजसा।
ततः शिष्यः समुत्थाय वाससी परिधाय च॥ .
कृतभस्मावलेपश्च संविशेद्गुरु सन्निधौ।"
ततो गुरुः स्वकीयात्तु हृदयान्निर्गतां शिवाम् ॥
प्रविष्टां शिष्यहृदये भावयेत्करुणानिधिः।
पूजयेद्गन्धपुष्पाद्यैरैक्यं वै भावयं स्तयोः॥
ततस्त्रिंशो दक्षकर्णे शिष्यस्योपदिशेद्गुरुः।
महामंत्रं महादेव्याः स्वहस्तं शिरसि न्यसेत् ॥
अष्टोत्तरशतं मंत्रं शिष्योपि प्रजेपेन्मुने ।
दण्डवत् प्रणमेद्भूमौ तं गुरुं देवतात्मकम्॥
सर्वस्वमर्पयेत्तस्मै यावज्जीवमनन्यधीः।
ऋत्विग्भ्यो दक्षिणां दत्वा ब्राह्मणांश्चापि भोजयेत् ॥

सुवासिनीः कुमारीश्च बटुकांश्चैव सर्वशः।
दीनानाथान्दरिद्रांश्च वित्तशाठ्यविवर्जितः॥
कृतार्थतां स्वस्य बुद्ध्वा नित्यमाराधयेन्मनुम्।
इति ते कथितः सम्यग्दीक्षाविधिरनुत्तमः॥
विमृश्यैतदशेषेण भज देवीपदाम्बुजम् ।
नान्यस्तु परमो धर्मो ब्राह्मणस्यात्र विद्यते ॥
वैदिकः स्वस्वगृह्योक्तक्रमेणोपदिशेन्मनुम्।
तांत्रिकस्तंत्ररीत्या तु स्थितिरेषा सनातनी ॥"[3]

श्रीमद्देवीभागवते दीक्षातत्त्वस्य साङ्गं वर्णनमुपलभ्यते। लोकमाध्यमेन सर्वे नियमाः, सर्वाणि द्रव्याणि च वर्णितानि। मंत्रग्रहणमेव दीक्षाग्रहणमुक्तम्। जीवपस्य श्रेष्ठेयमुपलब्धिः मन्यते यो हि मनुष्यः सद्गुरुं प्राप्य दीक्षां विधिवत् गृह्णाति स धन्यः कृतकृत्यश्च जायते। पुराणस्येमे शूलोकाः प्रायेण र्थावबोधकाः तस्मात् विशद् वर्णनं नैव विधीयते । परमेश्वरस्य कृपा यस्य जीवविशेषे भवति स दीक्षां गृह्णाति। यद्यपि दीक्षा एका एव ज्ञायते तथापि केचन भेदाः कल्पिता: आचार्यैः -

१. मन्त्रदीक्षा
२. स्पर्शदीक्षा
३. दृष्टिदीक्षा
४. उपदेशदीक्षा

मात्राणामनुरोधेन दीक्षा द्विधा बाह्यदीक्षा, आन्तरदीक्षा चाबाह्यदीक्षा कियादीक्षा तथा आन्तरदीक्षा इत्युक्ते वेधदीक्षा मन्यते। क्रियादीक्षायां 1. सम्पाद्यन्ते। बाह्य कर्मकाण्डस्य प्रयोजनं तत्र प्रामुख्येन भवति । दीक्षायां उपचाराणां प्रयोगः नैव क्रियते॥
चाक्षषीदीक्षा गुरोः कृपाकटाक्षेण सम्पद्येत। यथामत्स्यः दृष्टपातेन अण्डानि पुष्णाति पुनः तस्यादुत्पन्नान् मत्स्य शावकान् दृष्टिप्रदानेन पोषयति तथैव गुरोराचरणम् कलार्णव तन्त्रे लिखितं -

स्वापत्यानि यथा मत्स्योभीक्षणेनैव पोषयेत् ।
दृग्भ्यां दीक्षोपदेशश्च तादृशः परमेश्वरी ॥[4]

स्पर्शदीक्षायां गुरुः स्वहस्तेन शिष्यस्याङ्ग विशेषं स्पृशति तेन शिष्यं संसारात् मोचयति । यथा खगः स्पर्शमात्रेणाण्डानि पुष्णाति । तथैव करुणालयोगुरुःशिष्यस्यात्मोद्धारं विदधाति। मानसीदीक्षा एव वेद्यदीक्षानाम्ना प्रथिता। अस्यां प्रक्रियायां गुरुः ध्यानमाध्यमेन दीक्षां यच्छति यथा कच्छपी समुद्रेस्थित्वा तटस्थानि मृदाच्छादितानि अण्डानि सेवते ध्यानयोगेनैव अण्डानि प्रस्फोटयति समा प्रक्रिया दीक्षायाः अस्मिन् क्रमे बोधव्या। उक्तञ्च -

दर्शनात् स्पर्शनात् शब्दात् कृपया शिष्यदेहके।
जनयेत् यः समावेशं शाम्भवं स हि देशिकः॥[5]

अयं भावः यः दर्शनेन, स्पर्शनेन, मन्त्रपातेन च शिष्यदेहे शिवावेश सर्थः स वास्तविको गुरुः ज्ञेयः। अभिप्रायः वर्तते कृपा समग्रा भवेत्। अन्यत्रापि -

गुरोरालोकमात्रेण स्पर्शात् सम्भाषणादपि।
सद्य संज्ञा भवेत् जन्तोः पाशोपक्षयकारिणी॥

आत्मसंस्कारस्यापरं नाम दीक्षा वर्तते। मायया सांसारिकाणामात्माच्छादिता अवति। आत्मनः शाश्वतिकं स्वरूपं पूर्णानन्दमयं वर्तते। दीक्षया मलिनस्यात्मनः संस्कारः सम्पद्यते। अनया प्रक्रियया मलापनयनं भवति पुनश्च निवृत्तेः संस्कारोऽपि शान्तत्वमुपैति -

दीयते ज्ञानसद्भावः क्षीयते पशुवासना।
दानक्षपण संयुक्ता दीक्षातेनेह कीर्तिता॥[6]

अयमर्थः येन माध्यमेन ज्ञानं दीयते, पशु वासनायाः सर्वथाक्षयो भवति। दानक्षपणाभ्यां युता क्रिया दीक्षापदवाच्या।

सन्दर्भग्रन्थाः –


1. 'कुलार्णवतन्त्रम्
2. ' श्रीमद्देवीभागवतम् १२.७.३
3. श्रीमद्देवीभागवतम् - तत्रैव
4. 'दीक्षा - म०महो० गोपीनाथकविराज पृ० ०५
5. योगवसिष्ठ
6. 'दीक्षा - म०महो० गोपीनाथ कविराज पृ० २२